N. A.

Veer shaivol-karsa pradipika

वीर शैवोत्कर्ष प्रदीपीका

Sanskrit

Paper — Printed

1938 sambat (137 years old)

22 Folio

8" x 4.4"

Incomplete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पात्रतामुपगतः समंततः। योवसेत्क्षितितलेविरक्तिमांस्तं न
मामिगुरुसिद्धदेशिकं।४। योगसिद्ध रुसिद्धदेशिकानुग्र
हाधिगतशैववैभवः। तत्प्रबोधनरतः सुधापुरे भाति चन्न
बसवण्णदेशिकः।६। तादृशं गुरुमपष्टधृष्टदिदृक्ष्यापंडितोमुरिग
यार्यशीलवान्॥ तत्सुतनमतमंतथाविधं सन्मतं चममत
थ्यतामिति।७। इतीरयंतं मुरिगार्यशीलिनं गुरुस्तवप्रश्नयु
गोत्तरं क्रमात्। वक्तिं वितन्वन्निगमागमानुगां वदाम्यहं भणि
तिसोवदन्मुदा।८॥ सकलश्रुत्यागमपुराणप्रसिद्धाष्टावरणपं
चाचारविशिष्टतयामहालिंगैक्यरूपमोक्षसाधननिरूपणैकोत्त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रशानस्थलगर्भीकृतषट्स्थलप्रतिपादकसिद्धांतशास्त्रप्र॰
तिपाद्यज्ञानक्रियापरिभेदनरूपपदार्थसमर्पणप्रकारीभू॰
तांगलिंगशक्तिभक्तिहस्तमंत्रमुखपदार्थानुसंधानाश्रय॰
षड्भेदभिन्नस्थानात्रयविभूतेष्टलिंगप्राणलिंगभावलिं॰
गपूजोपासनैकतानमानसतयाच विशिष्टाद्वैतज्ञानसंपन्न
श्रीवीरशैवःसर्वोत्तरः। तथाहि। शांकरसंहितायां। अष्टावर
णसंपन्नःपंचाचारपरायणः। वैदिकं कर्म कुर्वीत ज्ञानैक॰
फलसाधनमिति। योहृस्ते निजलिंगेमिष्टे विन्यस्य तल्लीन॰
मनःप्रचारः। बाह्यक्रियासंकुलनिस्पृहात्मासंपूजयत्संग॰

पीठे ८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वारंगैवः। क्रिमिकीटपतंगेभ्यः पशवः प्रस्याधिकाः॥
पशुभ्योपितराः श्रेष्ठास्तेषु श्रेष्ठाद्विजातयः। द्विजातिष्व-
धिका विप्रा विप्रेषु क्रतुबुद्धयः। क्रतुबुद्धिषु कर्तारस्तेभ्यः
सन्यासिनोधिकाः। तेभ्यो विज्ञानिनः श्रेष्ठास्तेषु शंकरपूज-
काः। तेषु श्रेष्ठा महाभागममलिंगांगसंगिनः। लिंगांगसंगि-
ष्वधिकः षट्स्थलज्ञानवान्भवेत्। तेषामप्यधिको नास्ति-
त्रिषुलोकेषु सर्वथा। सर्वेषां सर्वदा पूज्यः संसारविजिगीषु-
भिः। इति पारमेश्वरे। विभूतिर्यस्य फाले स्ति कंठे लिंगमदा-
समकं। रुद्राक्षधारणं देहे सोहं देवि न संशयः। इत्यादि प्रमाणबला-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वीरशैवानां सर्वोत्तमत्वं सिद्धं । ननु श्रुतिभ्रष्टः श्रुतिप्रोक्तप्रा
यश्चित्ते भयं गतः । क्रमेण श्रुतिसिद्ध्यर्थं मनुष्यस्तंत्रमाश्र
येदिति । श्रुतिपथगलितानां मानवानां हि तंत्रं श्रुतिपथनि
रतानां न सदा नैव सेव्यं । अहंतस्वबलितानां हि नराणां वेदमा
र्गतः । पांचरात्रादयो मार्गाः कालेनैवोपकारकाः । कापालं पांच
चरात्रं च यामलं वाममार्हतं । एवं विधानि चान्यानि मोहनार्थानि
तानि तु । विष्णुभक्ताश्चैव ये केचित्कापालकृतभूषणाः । शैवाः पाशु
पताश्चान्ये पांचरात्रास्तथापरे । तथान्ये च दुरात्मानः सर्वेप्यसुर
दैवताः । पाशब्देन सर्वो धर्मोऽभिगतः पालनात्स्मृतः । तं खंडयंति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यस्मात्तेपाखंडास्तेन हेतुना। इत्यादिकौर्मब्रह्मकैवर्तसूतसंहिता
वासिष्ठलैंग्यपारमेश्वरोपपुराणवचनैः केवलतंत्राश्रयण
स्य निंदितत्वात्। वीरशैवानुष्ठेयधर्माणां तादृशतंत्रेष्वेव विहि
तत्वेन वैदिकेषु श्रुतिस्मृतीतिहासेष्वदर्शनात्। तादृशधर्मा
नुष्ठानैकतत्पराणां वीरशैवानां कथमुत्कर्षः प्रसाध्यत इति चे
न्नैवं। सांख्यं योगः पांचरात्रं वेदाः पाशुपतं तथा। आत्मप्रमा
णान्येतानि नो हंतव्यानि हेतुभिरित्यानुशासनिकमहाभारत
वचनात्। पुराणांतरैर्निंदितानां पांचरात्राद्यागमानां ग्रा
ह्यत्वप्राप्त्या तदुदीरितधर्माणामप्यवश्यानुष्ठेयत्वं सिद्धमेवान

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नुच भारतवचनेन पांचरात्रपाशुपतधर्माणामेवाचरणीय
त्वपर्यवसानेपि वीरशैवधर्माणां पांचरात्रपाशुपतानंतर्भावा
त् कथं तद्धर्मानुष्ठानपराणां मुक्तिरिति वाच्यं। पाशुपतस्य
वैदिकावैदिकभेदेन द्वैविध्यान्निषेधवचनानां अवैदिकपा
शुपतपरत्वेन विद्यमानानां वैदिकपाशुपतवीरशैवभिन्नप
रत्वेन व्यवस्थाया एव अप्पय्यदीक्षितैः कल्पतरुसारमानेपरि
मले पत्युरसामंजस्यादित्यधिकरणे पाशुपतभेदमुक्त्वा तत्र
लगुडीशपाशुपतस्य ग्राह्यत्वमभ्यधायि। तस्माद्वीरशैवधर्मा
णां तांत्रिकत्वं निषेध्यतावच्छेदकं न भवति। ननु लगुडीशपाशुप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तस्याप्येप्यदीक्षितैः कृते परिमले वैदिकत्वेनग्राह्यत्वप्रतिपादने
पि वीरशैवधर्मप्रतिपादकागमानां लगुडीशपाशुपतानांतभावि
भिन्नत्वात्। तेषामवैदिकत्वेनाग्राह्यत्वं पर्यवसितमिति चेन्न
सिद्धान्तसिखामणौ। वेदसिद्धान्तयोरैक्यमेकार्थप्रतिपादनात्
प्रामाण्यं सदृशं ज्ञेयं पंडितैरेतयोः सदा। क्रियासारे। अथ वाशि
व निश्वासप्रोद्भूतास्ते शिवागमाः। अधिकाः शिववक्त्रेभ्यः
साक्षादेव विनिर्गताः। परस्परविरुद्धार्थाः शिवोक्ता निगमाग
माः। अल्पबुद्धिभिरन्योन्यविरोधः परिकल्प्यते। निगमानामा
गमानां परमाप्तोपदेशतः। प्रामाण्यमविशेषेण ज्ञातव्यं तत्त्वदर्शि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भिरितिवचनैर्वेदविरुद्धवर्णाश्रमधर्मप्रतिपादकत्वेनसर्वा
त्मपरमेश्वरैककर्तृकत्वेनचागमप्रामाण्यस्यशिष्टैरभ्युपगत
त्वात्। तदागमोक्ताचाराणांसर्वेषांवैदिकानुष्ठेयत्वंसिद्धं। अन्य
थाशिवादिदेवतालयनिर्माणशिवलिंगादिप्रतिष्ठारथोत्सवा
दिविधिमंत्रोद्धारमंत्रदोषमंत्रसंस्कारमंत्रन्यासमुद्राविधाना
दिषुकेवलशिवागममूलेषुवैदिकानांप्रवृत्तिर्नस्यात्। किंच॥
सूतसंहितायांशिवमाहात्म्यकांडेऽप्तवचनविस्रंभणीयत्वप्र
स्तावे। अष्टादशपुराणानांकर्तासत्यवतीसुतः। कामिकादिप्रभेद
दानांयथादेवोमहेश्वरः। इतितत्स्मात्मानेविद्यारण्यश्रीपादैस्मस

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वचनेषु विश्वासोपपादनार्थमष्टादशोसुपक्रम्य कामिकादीनां
शैवागमानां शिवोक्ततया प्रामाण्यं यथा तथा नारायणावतार
रूपव्यासप्रणीतानामष्टादशपुराणानां प्रामाण्यमिति प्रतिपादि
तं तस्मात्तदागमोक्तानां वीरशैवधर्माणामनुष्ठेयत्वं सिद्धं तथा
षु चतदागमे अनादिशैवमादिशैवं महाशैवमनुशैवमवांतर
शैवं प्रवरशैवमंत्यशैवमिति भेदेन सप्तविधानां शैवानां मध्ये
आचारभेदभिन्नानां सामान्यशैवमिश्रशैवशुद्धशैववीरशै
वरूपतया चतुर्विधानां मध्ये वीरशैवस्याचारभेदेन सामा
न्यवीरशैवविशेषवीरशैवनिराभारवीरशैवभेदेन त्रिविधा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

णां तदनुष्ठेयभस्मरुद्राक्षधारणपंचाक्षरीजपलिंगधारणगुरु
लिंगजंगमपूजा तत्प्रसादोदकप्रसादस्वीकाररूपासाधारणवीर
शैवधर्माणां कालाग्निरुद्रभस्मजाबालचिदंबरवेदांतसार
द्युपनिषत्सु लिंगधारणादिप्रतिपादकेषु रुद्रतैत्तरीयादिमंत्रेषु
शांकरसंहितासूतसंहिताशिवरहस्यलिंगपुराणादिषु कामि
कादिवातुलांतेषु चाष्टाविंशतिशैवागमेषु प्रतिपादितत्वाध्य
श्राब्धित वीरशैवेषु तदितरवीरशैवेषु च सत्वाद्वैदिकत्वं अन्य
था वैदिकत्वेनाभिमतानां ब्राह्मणानां रथोह्वप्रतिष्ठादितांत्रि
कधर्मानुष्ठानवतां वैदिकत्वं न स्यात्। तथा च तत्समानन्यायतया
सिद्धं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्या वैदिकत्वं निरपायं। ननु वीरशैवधर्मप्रतिपादकश्रुत्यागमे
नामाचारभेदेन सामान्यविशेषनिराभारसमारम्भातत्वतां:
भक्तमाहेश्वरप्रसादिप्राणलिंगिशरणैक्यस्थलानां आचारलिंग
गुरुलिंगशिवलिंगजंगमलिंगप्रसादलिंगमहालिंगाभिधानां ।।
लिंगस्थलानां पूर्वोक्तांगस्थलानां च उत्तरोत्तरधर्माचरणस्य पूर्वध
र्माचरणानंतरभावितयाक्रमितत्वेनोत्तरदशाधर्माचरणस्य कालः
हस्तिश्रीशैलादिदेशस्थितयज्ञोवीतधारणलिंगधारणादिवैदि
कतांत्रिकधर्मसमुच्चयानुष्ठानपराराध्यविहितत्वेननेतुंशक्यत्वात् ।।
कथमाराध्येतरकेवलवीरशैवविषयत्वमिति चेन्न। असाभ्भमि

भ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टं। इति श्वेताश्वतरोपनि
षदि। अत्याश्रमी सर्वदा सकृद्वा जपेदिति कैवल्योपनिषदि। आश्र
यमाणस्यात्याश्रमिणः। तस्य ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च
भिक्षुकः। अतिवर्णाश्रमी चेति क्रमाच्छ्रेष्ठा विचक्षणाः। गृह
स्थोपि वनस्थस्य यतेरप्यंबुजेक्षण। विध्युत्कर्षबलेनैव गुरुर्भ
वति नान्यथा। वानप्रस्थाश्रमस्थोपि तथा संन्यासिनो हरे। विध्यु
त्कर्षबलेनैव गुरुर्भवति नान्यथा। अतिवर्णाश्रमी प्रोक्तो गुरुः स
र्वाधिकारिणां। न तस्यापि भवेच्छ्रेष्ठो यथाहं पुरुषोत्तम। अतिवर्णा
श्रमी साक्षाद्गुरूणां गुरुरुच्यते। यस्य वर्णाश्रमाचारो गलितः स्वात्मद
र्शनात्। स वर्णानाश्रमान् सर्वानतीत्य स्वात्मनि स्थितः। योतीत्य स्वाश्र

मात्वर्णानामन्त्येव्यवस्थितः। सोतिवर्णाश्रमी प्रोक्तः सर्ववेदांत
वादिभिः। पंचाक्षरी परा विद्या शिवज्योतिरवाप्तये। ॐकारः प्रण
वः सूक्ष्मो विद्यानां बीजमुत्तमं। तस्मादशेषतत्वानि प्रणवेन विशो
धयेत्। भस्मनोद्धूलयेद्देहं त्रिरित्यादिमंत्रभिः। त्रियायुषं जम
दग्नेरिति कुर्यात्त्रिपुंड्रकं। विचिंतयेदात्मनि शंभुमीशं शिवं परं
शांतमुमासहायं। भस्मांगमाविष्कृतदीप्तिदेहमस्याश्रमाचारमि
मं वदंति। अस्याश्रमोयं सर्वेषु चतुर्ष्वप्याश्रमेषु च। यः पशुः सप
शुत्वं चयन्नतेनानेन संसृजेत्। विशोध्य सर्वतत्वानि प्रणवेनाथ वापु
नः संस्थाप्यमयि चात्मानं निर्मलेपरमेश्वरे। ग्लावइत्वात्मनोदेहं तेनैः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बंधानवारिणा। एष पाशुपतो योगः पशुपाशविमुक्तये। सर्ववेदां
तसारोयमत्याश्रम इति स्मृतः। व्रतं पाशुपतं येन सम्यगाच-
रितं मुदा। तस्य ज्ञानं विजायेत तेन पाशविमोचनम्। इत्यादि
कामिकस्कांदलैंगयशिवागमवचनैरिति वर्णाश्रमिणां व
र्णाश्रमधर्माचरणशीलेभ्यः ऽत्कृष्टत्वप्रतिपादनात्। अत्याश्र
मित्वं पंचममुखसमुद्भूतपंचमाश्रमवस्तु वीरशैवेषु पर्यव
स्यतीति न पूर्वोक्ताराध्यपरत्वशंकावकाशः। अत एव पूर्वोक्तः
क्रिमिकीटपतंगेभ्य इत्यादिवीरशैवसर्वोत्कर्षप्रतिपादकशांक
रसंहितावचनमप्यभिचरितं तया पर्यवस्यतीति ननु अत्याश्रम-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतिपादकश्रुत्यागमपुराणवचनानि न तेष्वेव पर्यवस्यंति किंतु
वर्णाश्रमाचारवत्सु ब्राह्मणेष्वाराध्येषु तदंतिकेष्वपि पर्यवस्यं
ति। तथाहि। अत्र वर्णाश्रमाचारा इत्यत्र ब्राह्मणक्षत्रियवैश्य
शूद्राश्चेति चत्वारो वर्णाः। अशूद्राणामदुष्टकर्मणामुपनयनम
ध्ययनमग्न्याधेयं फलवंति च कर्माणि योग्यानि। ब्रह्मचर्यगार्ह
स्थ्यवानप्रस्थसंन्यासिनां भेदेन आश्रमाश्चत्वारः। तत्र गुरु
कुलवासभिक्षाचरणवेदाध्ययनादिकं प्रथमाश्रमधर्मः। गर्भा
धानादिगार्ह्यकर्मसप्तपाकयज्ञसप्तहविर्यज्ञसप्तसंस्थायज्ञपंच
महायज्ञरूपाष्टाविंशत्संस्काराः। यजनयाजनाध्ययनाध्यापन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दानप्रतिग्रहरूपषट्कर्माणि द्वितीयाश्रमधर्मः। वनवासदारकं
दफलाहारनियमजटाजिनधारणकृच्छ्रचांद्रायणाद्याचरणं
तृतीयाश्रमधर्मः पूर्वोक्ताश्रमत्रयधर्मत्यागपूर्वकं ब्रह्मविचार
भिक्षाचरणरागद्वेषादिवर्जनवाङ्नियमैकरात्रवासयोगा
भ्यासादिकं तुरीयाश्रमधर्मः। अतिवर्णाश्रमाचार इत्यत्र अ
तिक्रांतवर्णाश्रमाचाराणीति। अस्यार्थः क्रांताद्यर्थे द्विती
ययेति समासः करणानुशासनमर्यादया शब्दार्थो योजनीयः। सच
पूर्वोक्तधर्माचरणवस्तु संभवतीति अतिवर्णाश्रमाचारादि
शब्दादीनां प्रतियोगिप्रसक्तिसापेक्षाणां प्रतियोगिसंबंधं वि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाक्तेषु आराध्यप्रतिरिक्तेषु वृत्तिः कथमुपपद्यते निषेधवा
चकानां शाब्दानां प्रतियोगिसंबंधसंभावनाशालिष्वेव वर्त
नौचित्यादिति चेन्न। अतिवर्णाश्रमाचाराः संभवंत्यूर्ध्वव
क्त्रतः। ते वै साक्षान्महादेवे विमोदंते ह्यागमेषु च। पंचास्यपं
चममुखाद्यथा जातास्तथाधिकाः। पंचमाः सर्ववर्णेभ्यो म
क्ता मत्क्रियाः सदा। लिंगं शिवो भवेत्क्षेत्रमंगसंयोग आश्रयः
तस्माल्लिंगांगसंयुक्तो योपि सोऽसावाश्रमी भवेत्। इति ईशानका
स्या ऊणवंशजानां लिंगांगशोभा भिक्ष मोक्षमार्गैकनिष्ठाः। लिं
गांगसामरस्याच्च शरीरे लिंगधारणं। नियमेनैव कृता ते मुक्ताः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मिका

संसारबंधनात् इति कौद्यागमक्रियासारोदाहृतवेदांतसारोप

निषदादिवचनैर्वीरशैवानां अतिवर्णाश्रमाचारादिशब्दानां

रूढ्याभिधेयत्वस्यसम्यग्वक्तुशक्यत्वात्। नचअसाश्रमिशब्दः

रूढाश्रमधर्माचरणेषुप्रवर्तते। प्रतियोगिशब्दत्वादितियुक्त

पपन्नं। अपहतपाप्मादिशब्दानां वैदिकानां ब्रह्मणि प्रतियो

गिनां पाप्मनामसंभवात् प्रवृत्तिर्नस्यात् किंच भुकवामदेवव

त्जन्मांतरीयैर्वर्णाश्रमधर्मप्रकल्पनान्न वैय्याकरणानुशा

सनविरोधः नचैवमसाश्रमिशब्दार्थसंगतिर्निर्वहणेवीरशै

वातिरिक्तानामितरेषां विरक्तानां ज्ञानिनां भ्रक्षणमप्यसाश्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मित्प्रसङ्ग इति वाच्यं । अतिवर्णाश्रमाचारा इति वचनत्र
योगात्रूढत्वशालिनः अस्याश्रमिशब्दस्य केवलयोगेन
पंकजशब्दस्य तरणीलोमलादिविवृत्तेरयुक्तत्वात् रूढि
योगमपहरतीति न्यायात् । अत एव हीनशब्दस्य अन्तः
रवः कृतावितिसूत्रमर्यादया अहर्गणवाचिनः द्विरात्रा
त्रिरात्रादिसाध्यक्रतुपरत्वमेव हीनो न भवतीत्यहीन इति
योगेन वैदिकादिक्रतुसामान्यहंतरपरत्वमिति अहीनो वा
प्रकरणादाविसधिकरणे तृतीयाध्याये पूर्वतंत्रे अयमेव न्या
योऽप्युक्तादितः तस्मादस्याश्रमिशब्दो वीरश्रेष्ठेषु संभवति । यद्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

योगशास्त्रावीरशैवपरत्वंकल्पइतुंशक्यते।तथाहि।ननुहियस्मात्वै
पादपूरणेप्रजनेस्वतीममरकोशेनखतिप्रजायामितिसूत्रेणधं
अतिशयिताःपूजिताःवर्णाश्रमाचारायेष्वितीतिव्युत्पत्तेःनचै
तानिवचनानिअसांभ्रमिश्रस्यां र्वशिरोआबाललोकेऽतिक
र्मिमताप्रूर्वकानुष्ठेयपाशुपतापरपर्यायभस्मरुद्राक्षधारणादू
पस्यस्वात्मज्ञानपूर्वकाखिलसंस्कारपरित्यागिनस्ययत्किंचि
ज्ञातीयस्यलिंगधारणादिनारहितस्यवासहितस्यवाआरा
ध्यविप्रस्यवाउतकेवलस्यवाअसांभ्रमिश्रसंबंधवाच्यकानि
नसंभवंतीतिनकेवलंवीरशैवप्रतिपादकानीतिवाच्यं।वर्णा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रमधर्मवतामाराध्यविप्राणामप्याश्रमित्वाभिधेयतायो
ग्यहात्।परमेश्वरपंचमुखसंभूतप्रमथगणनायकघंटाक
र्णगजकर्णरेणुकदारुकगोत्रजानांकेवलातिवर्णाश्रमधर्मा
नुष्ठायिनांकेवलवीरशैवानामेवोक्तश्रुत्यागमपुराणस्यअति
साश्रमित्वप्रतिपादितोचितत्वात्।नचप्रमथानांपरमेश्वरपंच
मुखसमुद्भूतानामप्यंतरंगगणानांप्राकृतमनुष्यवत्प्राकृतत्वोप
रिग्रहाभावात्कथमेतेषांतद्वंशजत्वंतथापियद्यस्तितर्हि
आराध्यविप्राणामपितद्वंशजत्वमस्तीतिवाच्यं।द्वारपोपस्य
शद्वारपायस्वाहाद्वारप्युपस्यशद्वारपैस्वाहेतिईशानबला

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्मकर्मविहारपञ्चाब्दवाच्यतं दिकेश्वरस्यतसह्याः सुयज्ञादि
ष्ठाः पुराणादिषुप्रसिद्धयाः विद्यमानत्वेन लोकानुग्रहार्थं
परमेश्वरस्य किरातरूपादिधारणवत् प्राकृतस्त्रीपरिग्र
हसंभवे तद्वंशजत्वस्यापि केवलानां वीरशैवानां संभवात् ।
आराध्यविप्राणां तु सर्वथा तद्वंशजत्वानुचितत्वात् । यदि वीर
शैवधर्माचरणाभिमानेन तद्वंशजत्वमस्तीत्युच्यते तर्हि
भारद्वाजागस्त्यांगिरसविश्वामित्रभार्गववासिष्ठेत्यादि
गोत्रजननिमित्तात्वं न स्यात् । न चेष्टापत्तिः । वृश्चिकभ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

याम्लायमानस्य आशीविषमुखनिपातनमिव ब्राह्मणत्वस्यै
पि भंगः स्यात्। नच ऋषिवंशजत्वं प्रथमं वंशजत्वं उभयवंशज
त्वमस्माकमाराध्यविप्राणां संभवतीति वाच्यं। किमुत्सृष्टाचो
भयवंशजत्वमुच्यते किं शिष्यसंप्रदायेन वा नाद्यः गर्भेन सं
भवति। तस्माद्गर्भो द्विरेतार इति श्रुत्या गर्भवदेकस्योभयवी
र्योस्तौ असंतलोकहास्यता स्यात्। न द्वितीयः तादृशसांप्रदाय
स्य गौणतया चतुर्थवर्णस्यापि संभवात्। तस्मात्केवलानां वीर
शैवानां गणवंशजत्वात्। कामिकागमे उत्तरभागे। शृणु देवि।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वराहोहममैतेगणनायकाः।मयानियुक्ताभूलोकंगत्वासक
लज्ञातिषु।संजाताश्चगणाःकेचित्केचिल्लिंगेषुमूर्तिषु।सं
भूताश्चपुनर्लिंगपूजाध्यानपरायणाः।स्थापयंतोवीरशै
वमार्गंमोक्षप्रदंभुवि।सर्वप्राणिहितार्थायमुद्रापंचक
धारिणः।षट्स्थलज्ञानवंतश्चानादिजंगममूर्तयः इति ई
श्वरसंहितायां।वक्ष्येतेगणनायकाःक्षितितलंगत्वानि
युक्तामयासंभूताःसकलासुजातिषुपुनर्लिंगार्चनातत्प
राः।संस्थाप्योत्तरवीरशैवपदवींलोकेहितार्थंनृणां।मुद्राः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पंचवह्तंत एव विचारसंतेसमेष्यंतिमामितितस्मादस्याश्रमिश्र
बद्वाच्यहेनसर्वोत्तमत्वंयुक्तमेव अत एव पूर्वोक्तन्यायानुकू
लवचनानितेष्वेवसम्यगुपपादयितुमुच्यतेतराणितथाहि
विभुक्षाःप्राकृताश्चेतिद्विविधामानुषास्मृताःशिवसंस्का
रिणःभुक्षाःप्राकृताइतरेजनाः।वर्णाश्रमादिधर्माणांस्व
वस्याहिद्विधामता।एकेशिवेननिर्दिष्टाब्रह्मणाकथितापु
रा।शिवोक्तधर्मनिष्ठानुशिवाश्रमनिषेविणां।शिवसंस्कार
हीनानांधर्मःपैतामहःस्मृताःइतितस्मात्प्राकृताप्राकृतभेद
भिन्नमार्गतयागणवर्ज्ञानामप्राकृतानांवीरशैवानामति
वर्णाश्रमिश्राबद्वाच्यानांपंचमाश्रमिणामनितरसाधारण

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वातिशायित्वमुपपद्यते। एवे तिनकोपि शांकाव काशः तस्मि
न्मतस्य सर्वोत्तमत्वं सिद्धमेव। तथैव प्रमाणानि। न वीर
शैव सदृशं मतमस्ति जगत्त्रये। सर्वभोगप्रदं पुण्यं शिवसा
युज्यदायकं। यथा मत्स्यदृशो नास्ति पुरुषोत्तयासमा। स्त्रीणां
तथा वीरशैवः सदृशं नास्ति वै मतं। अपिपापशतं कृत्वा ज्ञान
तोज्ञानतोपि वा। वीरशैवमतं प्राप्तः शिव एव न संशयः। लिंग
धारणमात्रेण शिवत्व प्राप्ति कारणात। शैवं मममतं देवि सद्यो
मुक्ति प्रदायकं। यथा नदीनां सर्वासां पुण्या भागीरथी शिवे। यथै
व भवतां सर्वयोषितां पुरुषेष्वहं। यथैव काशी क्षेत्राणां तीर्थेषु

मणिकर्णिका। ममपंचाक्षरीमंत्रस्सर्वमंत्रेषुवैयथा। यथैवसर्व
लोकेषुकैलासस्थानमावयोः। वीरशैवमतंदेविममसर्वोत्त॰
मोत्तममितिपारमेश्वरवीरागमवचनैश्चपूर्वोक्तन्यायोप॰
बृंहितश्चसागमवचनैश्चशिवस्यस्मृतिपुराणन्यायसिद्ध
सर्वदेवोत्तमोत्तमत्ववद्वीरशैवमतस्यसार्वातिशायित्वंसिद्धं।
तन्मतनिष्ठोवीरशैवाचारभेदेनसामान्यवीरशैवोविशे
षवीरशैवोनिराभारवीरशैवश्चेतित्रिविधः। गुरूक्तेनैवमा॰
र्गेणभूतिरुद्राक्षधारणं। पंचाक्षरजपंदेविकुर्यान्निसमतंद्रि
तः। गुरुणादत्तलिंगंतुसावधानेनधारयेत्। इष्टलिंगंप्राणलिं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गं भाव लिंगच पार्वति। एकीकृत्यार्चनं कुर्याद्वीरशैवो न भेद
त इति सामान्य वीरशैव लक्षण प्रतिपादनात्। आत्मानं ॥
वा भूताश्चापि भूषणा निधनानि च। यत्स्वकीयमभिप्रेतं
त त्कुर्यार्पिंगमार्पितं। अनुभूतं तु तैः पश्चात्तदायत्तं यमा
त्मसात्। कुर्यात्प्रसादं तु ध्यायः स विशेष इति स्मृतः। इति व
चनैर्विशेष वीरशैव लक्षण प्रतिपादनात्। जटीमुंडी शिखी
वापि काषाय वसनान्वितः। निस्पृहो निज लिंगैक्य भिक्षाशी
भयवर्जितः। मौनीभूतस्त्याग युक्तो निराभार इति स्मृतः। कमंड
लु धरो भूतिरुद्राक्षसंयुतः। दंडकौपीन धारी च निराभार इ॥
कंथा

तिस्मतः। निरस्तकर्मभारत्वान्निराभार इतिस्मृतः। इतिसूक्ष्म
तंत्रवचनैः निराभारवीरशैवलक्षणप्रतिपादनात् सामान्य
वीरशैवापेक्षयाचर्यमादिशब्दवाच्यः निराभारवीरशैवदेशि
कोत्तमः विरक्ततयासर्वोत्तमोत्तम इतिनिर्विवादः किंचशि
वरहस्ये। लिंगंस्यादिष्टरूपंतुजंगमःप्राणलिंगकं। भावलिंगं
गुरुप्रोक्तं त्रिविधंह्येकमुच्यते। कारणागमे। आनीयामथ
दानेदान देशिकोत्तमजंगमान्। निसंपूर्णतमप्रसादंस्वात्मभा
वेनभावयेत्। वीरागमे। लिंगांगीगुरुलिंगेच त्रिविधंह्येक
मुच्यते। प्रसादेमुक्तिमूलश्चप्रसादोलिंगमुच्यते सिद्धांत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रभुः

शिखामणौ। एक एव शिवः साक्षात्सर्वानुग्रहकः। गुरुजंगम
लिंगात्मा वर्तते भुक्तिमुक्तिदः। इत्यादिवचनैर्गुरुलिंगजंग
मानां सच्चिदानंदस्वरूपाणां यथा ब्राह्मणः सच्चिदानंदल
क्षणलक्षितस्य प्रवहार दृष्ट्यासत्वेन चित्वेपि न आनंदत्वेन
भिन्नत्वेपि परमार्थस्वरूपेण यथा भेदोंगीक्रियते तद्वद्गुरुलिं
गजंगमानां भिन्नत्वेपि शास्त्रमर्यादया तत्वतश्चैक्यमेव सिद्धं
भवति किंच तत्स्वरूपस्य त्रैकालिकाबाधितारूपसद्रूपापेक्ष
यास्वप्रकाशरूपत्वेन चिद्रूपस्यापि विश्वं रथं चेदपि चिद्रूपस्य
स्वप्रकाशस्य सर्वप्रार्थनीयत्वाभावेन परमप्रेमास्पदत्वाभावे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न तु भयरूपयोः आनंदस्वरूपे विद्यमानत्वेन तस्याप्यर्हितत्वं।
यथा चरत्वस्यापि सर्वास्याप्यर्हितत्वं। तथाहि सिद्धांतशिखाम-
णौ। लिंगं तु द्विविधं प्रोक्तं जंगमाजंगमात्मना। अजंगमं तु य-
ल्लिंगं शिलादिविनिर्मितं। तद्वज्जंगमं लिंगं शिवयोगीति-
विश्रुतं लिंगं च जंगमं चैव तदाधिक्यं वदामि ते। जंगमं ज्ञा-
नरूपं तु क्रियारूपं तु लिंगकं। स्वायंभुवागमे। अंगद्वयं समाख्या-
तं चरं स्याच्चरमेव च। चरं त्वतिथिरूपं स्यादचरं पार्थिवादि-
कं। चरे सदा वसत्येव प्रीतियुक्तो महेश्वरः। अचरे मंत्रसंस्कारैः
स्वयं तिष्ठन्महेश्वरः। शिवधर्मशास्त्रे। चरे सदा वसत्येव प्रीति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

युक्तोमहेश्वरः। अन्तरेमंत्रसंस्कारैर्ययोनियंमहेश्वरःशि
वरहस्योपदेहमितितन्नातंपदार्थः प्राण एव चाउभयोरंत
रंयद्भूतद्धस्याल्लिंगजंगमे। स्थावरंजंगमंचेतिद्विविधंलिं
गमुच्यते। जंगमस्यावमानेनस्थावरंनिष्फलंभवेत्सोव
रलाकरे। लिंगक्षेत्रंगुरुस्थानंगुरुक्षेत्रंचजंगमः। जंग
मस्तुनिराभारीभाराभारविवर्जितः। इत्यादिसिद्धांतसि
खामणिस्वायंभुवागमशिवधर्मशास्त्रशिवरहस्यादिवः
चनैश्चचराचररूपस्यलिंगस्यद्विविधस्यमध्येमंत्रसं
स्कारायत्तमहिमस्थिरलिंगापेक्षयाचरलिंगस्यसार्वकालिः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भुंके

कथटूस्थलज्ञानसंपन्नस्यजंगमशब्दाभिधेयस्यस्थिरलिं
गापेक्षयाधिक्यंसिद्धमेव।अतएवआरग्वधेन्यबिल्वेन्य
लिंगेन्चगुरुविग्रहे।शिवयोगिशरीरेन्चसदासन्निहितःशि
वइतिपदेकोब्रह्मविं भुर्भों जगत्तर्पयतेखिलं।इत्यादिवच
नानिज्ञानिनश्वर लिंगस्याधिक्यप्रतिपादकानिबहू१
निसंगच्छंते।वैद्यशास्त्रे।इतिहासपुराणेषु शिवस्याप्यति
थिर्गुरुः।अतिथेःपादसलिलमधिकंहिजगत्त्रये।वीरागमे।
जंगमस्यप्रसादान्नंनैवेद्यार्थप्रकल्पयेत।पादांबुजमलस्नोविशे
षोहिममोच्यते।पारमेश्वरे।पादाभिषेकसलिलैलिंगमज्जनमु१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्तमं। तत्प्रसादं चनैवेद्यं तथा मुक्तिफलं ध्रुवं। ब्रह्मांडपुराणे। जं
गमानां पादतीर्थं लिंगमज्जनमुत्तमं। तत्प्रसादान्महादेवि नैवे
द्यं शुभदं स्मृतं। तस्माज्जंगमलिंगस्य प्रसादेन समार्पणं। अ
भिषेकजलस्नानं विशेषेममकथ्यते। इत्यादिवैयश्शास्त्रवी
रागमपारमेश्वरब्रह्मांडादिपुराणवचनैर्लिंगस्य जंगमपादो
दकस्नानतत्प्रसादसमर्पणप्रतिपादनाल्लिंगापेक्षया जंगमस्या
धिक्यं सिद्धमेव। ननु इष्टलिंगपूजाप्रकरणे एवं वचनानां प्र
यमाणत्वादिष्टलिंगएव चरपादोदकमज्जनं तत्प्रसादनिवेदनं च
प्रकरणात्तत्प्रसंगं ननु स्थिरलिंगे अप्रकृतादिति चेन्न स्थिरलिंगार्चको

मर्यान्तसूर्ध्वः पंक्तिकर्मसु। धृतलिंगार्थकामसंपावनाः पंक्तिक
र्मसु। चितिं च चितिकाष्ठं च यूपं चांगलमेव च। स्पृष्ट्वा देवलकं चैव
सवासा जलमाविशेत्। त्रिवर्षं देवतापूजामन्यार्थं यः करिष्यति।
स वै देवलको नाम सर्वकर्मबहिष्कृतः। इत्यादिवचनैः स्थिरलिं
गार्थकस्य देवलकत्वाद्ब्राह्मणत्वाभावात् सह वासं सहपंक्तिभोजनादे
स्तथा निषेधदर्शनात्। पाविनानुत्कृष्टत्वाप्रतिपादनाच्च इष्टलिंग
स्थिरलिंगपूजाकर्तॄणां उत्कर्षापकर्षप्रतिपादनाद्दिष्टलिंग।
स्थिरलिंगयोः क्रमेणोत्कर्षापकर्षौ निश्चेतव्यौ तथा च जंगमतत्व
स्य सर्वाभ्यर्हितत्वात् लिंगप्राणरूपत्वाच्च स्थिरलिंगापेक्षया प्राशस्त्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

येऽप्यत्र लिंगेपि जंगमपादोदकाभिषेचनपादविन्यासादिकैर्मुक्ति
कर्यों सिद्धः। एतदर्थानुसारीणि वचनानि। लिंगांगी मम प्राणो लिं
गांगी च मम प्रभुः। लिंगांगी मामको भावो लिंगांगी मम रक्षकः
लिंगांगी मम कर्ता च लिंगांगी मम सद्गुरुः। परमाद्वैतविज्ञानन
ष्ठस्यास्य महात्मनः। शुश्रूषा क्रियते येन तत्पादौ मम मस्तके। नि
रपेक्षं मुनिं शांतं निर्वैरं समदर्शिनं। अनुव्रजाम्यहं देवि पूर
यसंघ्रिरेणुभिः। कामिकागमे। सर्वप्राणिहितार्थाय मुद्रापं
चकधारिणः। षट्स्थलज्ञानवंतश्च ध्यानादि जंगममूर्तयः। ता
वत्स्वपादाब्जं निधाय मम मस्तके। दत्वा पादोदकं मह्यं प्रसादमेन

कास्मि। कुर्वंति वैपवित्रं मामंसेपुष्यंतिमामम। भक्तोममप्रियो
देवि भक्तः प्राणोममैवतु। मत्तोधिकोहिमद्भक्तस्तस्माद्भक्तेन
माम्यहं। तस्माल्लिंगेअंगमपादविन्यासादिकमुचिततरमितिसि
द्धं। ननुएतादृशपूर्वोक्तवचनानां लिङ्लोट्तव्यप्रत्ययाभावे
न विधायकत्वासंभवादर्थवादवाक्यानांस्वार्थेप्रामाण्याभावा
च्चएभिर्वचनैः कथंतीर्थप्रसादसमर्पणपादविन्यादिकंकर्त
व्यत्वेन कथमंगीकर्तुंशक्यमिति चेदुच्यते। औदुंबरोयूपोभव
ति। उपांशुयाजमंतरायजतीत्यादाविव। लिङ्त्वेनभासमानस्य
आरभ्यातस्यलेट्त्वपरिणामं कृत्वा विधायकस्यांगीकर्तुमुचित त्वा

त्।अन्यच्च वेदेषु लेद्रूपरिणामाद्यंगीकारेपि आगमवचनेषु
तथांगीकर्तुमशक्यत्वात्। तदभिमतसिद्धिः। कथंसंगच्छत इ
ति वाच्यं। न हि इतिहासपुराणस्मृतिवाक्येष्वप्येतादृशान्यायप्र
वृत्तिर्नस्यात्। अन्यथैवोपपत्तिः। स्तेयं कृत्वा सुरांपीत्वा गुरुदारांश्च ग
त्वा ब्रह्महत्यांच कृत्वा भस्मच्छन्नो भस्मशय्याशयानो रुद्राध्यायी
मुच्यते सर्वपापैरिति शातातपस्मृतिवचनस्यगायमास्तु अपः
कोटिब्रह्महत्यामपोहति। एकादशगुणाञ्जप्त्वापि रुद्रानावृत्य धर्मवि
त्। महापापैरपि स्पृष्टो मुच्यते नात्रसंशयः। संध्यास्नानं अपोहोमः दे

वतानां च पूजनं। आतिथ्यं वैश्वदेवं च षट् कर्माणि दिने दिने॥ इ ऽ
ति लोकप्रसिद्धानां प्रायश्चित्तकांडे विज्ञानेश्वरमाधवादिधि ऽ
र्मशास्त्रकारस्मार्तैर्भिः आचारकांडे च परिगृहीतानां वचनानां ऽ
च स्वोक्तार्थे प्रामाण्यं न स्यात्। तस्मादुराग्रहमात्रेणान्यायस्य प्रव
र्त्तिरिति न भ्रमितव्यं। ननु एतेषां श्रुतिपुराणादीनां वेदमूलत्वा
त्। वेदवत्प्रामाण्यस्थापनसंभवेप्यागमवचनानां तथा प्रामाण्यं ऽ
न संभवतीति चेन्न। वेदागमयोरेककर्तृकत्वात्। वेदविरुद्धधर्म ऽ
प्रतिपादकत्वाच्च निश्वसितरूपवेदापेक्षया तान्त्वोत्कृष्टत्वात् परो ऽ
च्चरितकामिकाद्यागमानां च ऋग्वेदयजुर्वेदवद्वामदक्षिणनेत्रव[illegible]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्यसमप्रधानत्वात्प्रामाण्यंसिद्धमेवेतिवेदागमान्तरवचनवि
धीयमानंकर्मत्रिविधैराचरणीयमितिसर्वंसमंजसं। छ। ध।
इतिषट्स्थलचक्रवर्तिनिरंजनअंगमस्वरूपतोंटसिद्धेश्वर
कारुण्यपात्रसुधापुरस्यचन्नबसवस्वामिविरचितवीरशै
वोत्कर्षप्रदीपिकापरिसमाप्ताजाता। छ॥ शुभंभवतु। श्रीरस्तु
याद्दशंपुस्तकंदृष्ट्वातादृशंलिखितंमया। यदिशुद्धमशुद्धंवामम
दोषोनदीयतां॥१॥ भग्नपृष्ठकटिग्रीवस्तब्धदृष्टिरधोमुखं। क
ष्टेनलिखितंग्रंथंयत्नेनप्रतिपालयेत्। इदंपुस्तकंनिर्जरवरपुरं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दारकुमारशारपंजरकारवीरनरमित्रपुत्रपुष्पशाकारधुरमाराऽ
रिहरपुराभ्यंतरस्थिरायाभ्यसधर्मिणीधवकुंभसंभवार्णवाऽ
रिमैत्रावरुणिरितिऋषिराजिराजस्थानसन्निधस्थायाभ्यदऽ
ग्राम्यमेधाभिधघटनिकटस्थायाभ्यहरिकेशनंदनोद्यानवे
ष्ठितायाःजंगमवाटिकायाःअधीश्वराणांनिखिलयतिततिवरेऽ
ण्यकारुण्यसुधापात्रहरिहरेश्वरस्वामिनांपट्टचरमूर्तिद्वयाधिऽ
कारयुक्तविश्वाराध्यसिंहासनाधिष्ठितानांद्वितीयनामश्रीसिद्ध
लिंगस्वामिनांसिद्धेश्वरनाम्नाछात्रेणमहिसूरनगरस्थलिंऽ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गप्पार्थं लिखितं। चरसंपुस्तकं मत्रिपुत्रदिनाभिजन्यतु थिति
धिमवधीकृसराजनीलपनसं धौम्समाप्तिमगमत्। संमत १९३८।
श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ६ ६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri